**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# याज्ञवल्क्यीया दार्शनिकी दृष्टिः

**रोहिणीराज तिमिल्सिना**

उपप्राध्यापकः, त्रिभुवन-विश्वविद्यालयः

rrtimilsina@gmail.com

https://orcid.org/0009-0009-7286-2471

https://doi.org/10.3126/srj.v1i2.99139

**शोधसारः**

*अद्वैतवेदान्तस्य समृद्धायां वैदिक्यां दार्शनिकपरम्परायां महर्षेर्याज्ञवल्क्यस्य स्थानमद्वितीयं विद्यते। शोधात्मकेऽस्मिन् लेखे महर्षेर्याज्ञवल्क्यस्य चिन्तनशैली, दार्शनिकी दृष्टिः, तस्य अद्वैतपरो वैचारिको गरिमा च मुख्यविषयत्वेन स्वीकृताः सन्ति। विशेषतो बृहदारण्यकोपनिषदो 'याज्ञवल्क्यकाण्डम्' प्राथमिकस्रोतसामग्रीत्वेन स्वीकृत्य तस्य दार्शनिकदृष्टेर्गभीरां समीक्षां कर्तुमिह प्रयतितमस्ति। सन्दर्भतः प्राप्तानां सैद्धान्तिकतथ्यानां स्मृति-पुराणेतिहासादिग्रन्थानाञ्च अस्मिन्नध्ययने सम्यगुपयोगो विहितोऽस्ति। याज्ञवल्क्यस्य तत्त्वनिरूपणशैल्याम्, प्रयुक्तासु युक्तिषु, दृष्टान्तेषु च परवर्तिभ्योऽद्वैताचार्येभ्यः किञ्चिद् वैलक्षण्यं प्रतीयत एव, तथापि अद्वैतस्य मूलसिद्धान्तप्रतिपादनदृष्ट्या अद्वैताचार्येषु न किमपि वैभिन्न्यं वर्तते। प्राक्तनानां परवर्तिनाञ्च समेषामाचार्याणां प्रतिपाद्यमेकमेव पारमार्थिकसत्यमद्वैततत्त्वं खलु। श्रौतसंवाद-स्मृत्यादिग्रन्थानां माध्यमेन आत्मसत्यत्वस्य जगन्मिथ्यात्वस्य च आधारशिलां स्थापयितुं याज्ञवल्क्यस्य योगदानमतुलनीयमाभाति। अस्मिन् शोधलेखे याज्ञवल्क्यस्य दार्शनिकदृष्टेः, परवर्तिचिन्तने तस्याः प्रभावस्य च निरूपणायायासो विहितोऽस्ति। अध्ययनमिदमार्षग्रन्थानाम्, उपनिषदाम्, शाङ्करभाष्याणां तथा च परवर्तिनां वेदान्तग्रन्थानां प्रामाणिकसन्दर्भेषु समाश्रितम्, अन्वय-व्यतिरेक-प्रक्रियाभ्यां पाठ्यविश्लेषणेन च युक्तं श्रौप्रमाणपरं वर्तते। विश्लेषणात्मिकां तुलनात्मिकाञ्च पुस्तकालयीयां शोधपद्धतिमवलम्ब्य एतत् सम्पादितमस्ति। याज्ञवल्क्येन अन्वयप्रक्रियया "इदं सर्वं यदयमात्मा", "यः सर्वेषु भूतेषु तिष्ठन्नन्तर्याम्यमृतः" इति ब्रुवता एकत्र सार्वात्म्यभावः निरूपितः, अपरतश्च व्यतिरेकप्रक्रियया "नेति नेति", "अतोऽन्यदार्तम्" इति कथयता अनात्मप्रपञ्चस्य नश्वरत्वं मिथ्यात्वञ्च साधितम्। जनकस्य ब्रह्मसभायां गवां ग्रहणे "गोकामा वयं स्मः" इति वदता ब्रह्मिष्ठो भूत्वापि दर्शिता निरभिमानता, गार्गी-शाकल्ययोः प्रसङ्गे च पालिता शास्त्रमर्यादा ब्रह्मविद्यायाः प्राप्त्यै शिष्टतायाः अवधानतायाश्च महत्त्वं ख्यापयति। एवञ्च महाभारतस्य शान्तिपर्वणि समागता याज्ञवल्क्यगीतापि अस्य अद्वैतपरं तच्चिन्तनं परिपोषयति। अध्ययनादस्मादिदं सुस्पष्टं सिद्ध्यति यद् महर्षियाज्ञवल्क्य एव अद्वैतवेदान्तस्य सैद्धान्तिक्याः सरण्या अन्यतमः प्रमुखः आधारस्तम्भ औपनिषदपुरुषस्य मुख्यो व्याख्याता वा अस्ति। तेन प्रतिपादिता आत्मनः स्वयंप्रकाशता, नित्यज्ञानस्वरूपत्वम्, सर्वान्तिरत्वम्, तद्ग्रहणे मनसो वृत्तिव्याप्यता, "नेति नेति" इति वाक्येन अनात्मनो निरसनम्, वैराग्योत्पत्त्यनन्तरं सद्यः संन्यासस्य क्रान्तिकारी मार्गश्चैव परवर्तिनां श्रीमदाद्यशङ्कराचार्य-विद्यारण्यमुनि-सदानन्दादीनामद्वैताचार्याणां सिद्धान्तानां मूलं स्रोतः। महर्षेर्याज्ञवल्क्यस्य दार्शनिकचिन्तनमद्वैतवेदान्ते "ब्रह्म सत्यं जगन्मिथ्या" इति सर्वमान्यसिद्धान्तस्य स्थापनाय सुदृढां पूर्वाधारशिलां प्रास्थापयत्। तस्य नाम आचार्यवन्दनायां प्रत्यक्षतः अग्रथितमपि*

*तस्य योगदानम् अतुलनीयमस्ति। महर्षेरुपनिषदीया स्मार्ता च इयं वैचारिकी अद्वैतचिन्तनधारा अद्यापि वैश्विकपरिप्रेक्ष्ये अध्यात्मचिन्तकानाम्, वेदान्ताध्येतॄणाम्, मुमुक्षुसाधकानाञ्च कृते शाश्वतमार्गदर्शिका संलक्ष्यते।*

**शब्दबीजम् -** अतिप्रश्नः, अनूचानतमः, अन्तर्यामी, अयातयामः, आर्षभूमिः, ब्रह्मिष्ठः, वृत्तिव्याप्तिः, वेदप्रामाण्यवादी, स्वयञ्ज्योतिः।

## विषयपरिचयः

अद्वैतदर्शनस्य ऐतिहासिकपृष्ठभूम्याः प्रारम्भिक आधारबिन्दुर्महर्षिर्याज्ञवल्क्यः। तस्य सैद्धान्तिकं प्रकाशं विना अद्वैतदर्शनस्य परम्परा अपूर्णैव प्रतिभाति। अद्वैतदर्शनस्य महनीयतायाः प्रतिष्ठापने तस्य दार्शनिकव्यक्तित्वस्य सुदृढः प्रभावः समीक्षितो भवति। वैदिकवाङ्मये बीजरूपेण निविष्टमद्वैतदर्शनं याज्ञवल्क्यीयविवेचनशैल्या माध्यमेन यादृशीं स्पष्टतां प्राप्नोत्, तस्य एतदवदानमद्वैतदर्शनस्य परम्परायां सर्वदैव उच्चश्लाघाया विषयः।

गण्डकीतटे ब्राह्मीविद्यायाः साधको ब्रह्मर्षिर्वसिष्ठः, कौशिकीतटे ससर्परीविद्यायाः साधकः कौशिकमुनिर्विश्वामित्रः, एवञ्च कर्णालीतटे सौरीविद्यायाः साधक ऋषिर्वामदेव इव मिथिलाया महान् ब्रह्मविद्यासाधको महर्षिर्याज्ञवल्क्यः। वसिष्ठादीनां महर्षीणां भूमित्वेनैव नेपालभूरियमार्षभूमिः। ब्रह्मर्षिर्वसिष्ठ इव तत्त्वोपदेष्टा, मुनिर्व्यास इव च स्मृतिकारो महर्षिर्याज्ञवल्क्यः।

राजर्षेर्जनकस्य सभायां ब्रह्मिष्ठः समुद्घोषितः सोऽनुपमेयतत्त्वविश्लेषकत्वेन आलोकितो भवति। राजर्षेर्जनकस्य ब्रह्मसभायाः शास्त्रार्थस्पर्धायां गार्गी-शाकल्यारुणिप्रभृतयः समस्ताः तत्कालीना विख्याता विद्वज्जना विदुष्यश्च याज्ञवल्क्येन पराजिता आसन्। याज्ञवल्क्यो वेदप्रामाण्यवादी आचार्यः –

**न वेदशास्त्रादन्यत्तु किञ्चिच्छास्त्रं हि विद्यते।**
**सर्वं विनिःसृतं शास्त्रं वेदशास्त्रात् सनातनात्।।** (बृहद्योगियाज्ञवल्क्यस्मृतिः १२/१)

सकलशास्त्ररहस्यवेत्ता याज्ञवल्क्यो वैदेहस्य जनकस्य अष्टावक्र इव ब्रह्मतत्त्वोपदेष्टा गुरुरासीत्। वैदिकदर्शनस्य योऽद्वैतपरकः सिद्धान्तः पूर्वकालात् प्रथितिङ्गतोऽस्ति, तस्या एव परम्पराया आचार्यो याज्ञवल्क्यः। सोऽद्वैतवेदान्तपरम्पराया एको विशिष्ट आचार्यः। अस्याः परम्पराया आचार्याणां सिद्धान्तो मनागपि भिन्नो नास्ति। यदि किमपि भिन्नं प्रतीयते, केवलं चिन्तनशैलीषु भिन्नता, सिद्धान्तप्रतिपादनस्य मार्गो वा भिन्नः। अतो ब्रह्मर्षेर्वसिष्ठस्य पृथग् दर्शनम्, मुनेरष्टावक्रस्य पृथग् दर्शनम्, महर्षेर्याज्ञवल्क्यस्य च पृथग् दर्शनमिति न। सिद्धान्तनिरूपणस्य तत्त्वविवेचनस्य वा प्रक्रियागतपृथक्त्वमात्रेण कस्यापि भिन्नं दर्शनं भवितुं नार्हति। सर्वेषामेकमेव दर्शनम्, एक एव श्रुतिसिद्धान्तः। अतो वसिष्ठ-याज्ञवल्क्यादीनां सर्वेषामद्वैतदर्शनमेकमेव।

वस्तुतो याज्ञवल्क्योऽपि तस्यैव वैदिकदर्शनस्य एको महान् उपदेशकः। अद्वैतदर्शनस्य परम्परायां तत्त्वोपदेष्टृत्वेन तस्य उपस्थित्या समग्रमेव दार्शनिकं जगत् विशेषत उपकृतमस्ति। एतत्तु निश्चितमेव यत् तस्य दार्शनिकविवेचनं विना न्यूनज्ञानरश्मिना अद्वैतवेदान्तस्य सिद्धान्तभूमिः साधुतया भासिता न स्यात्।

बृहदारण्यकोपनिषदि वर्णितायां वैदेहस्य जनकस्य शास्त्रार्थसभायामनूचानतमो ब्रह्मिष्ठश्च सिद्धो महर्षिर्याज्ञवल्क्यो निर्भीको विद्वान् आसीत्। स विशिष्टोऽद्वैतवादी दार्शनिक इति ग्रन्थेषु यत्र तत्र परिचर्चितमस्ति। स वर्णाश्रमधर्मस्य परिपालक आसीत्। एष ब्रह्मचर्याश्रमानन्तरं गृहस्थो भूत्वा अन्ते संन्यस्तो बभूव इति ग्रन्थेषु उल्लिखितं वर्तते– **अमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार** (बृहदारण्यकोपनिषद् ४/५/१५)। द्वापरान्तस्य कश्चन विशिष्टो

वैदिकर्षिरिति स परिलक्षितो भवति। अद्वैतदर्शनेन सह योगशास्त्रेऽपि निष्णातस्य तस्य व्यक्तित्वं दार्शनिकाचार्यत्वेन योगीश्वरत्वेन च प्रख्यातिङ्गतं दृश्यते।

न केवलं बृहदारण्यकोपनिषदि स्मृतिग्रन्थेषु च, अपितु अन्येषु केषुचिदौपनिषदग्रन्थेषु, ब्राह्मणग्रन्थेषु, पौराणिकग्रन्थेषु, महाभारतादिषु ऐतिहासिककाव्यग्रन्थेष्वपि याज्ञवल्क्यस्य दार्शनिक्योऽभिव्यक्तयः प्राप्यन्ते, तथापि तस्य दार्शनिकचिन्तनस्य सुष्ठु चित्रं बृहदारण्यकोपनिषद्येव समुपलब्धमवाप्यते। मूलतो बृहदारण्यकोपनिषदो याज्ञवल्क्यकाण्डे तस्य दार्शनिकं चिन्तनं प्राप्यते, तथापि विकीर्णरूपेण दार्शनिकविचारैः सह याज्ञवल्क्यसम्बद्धा न्यूनाधिकाः सन्दर्भा गोपथब्राह्मणे, जाबालोपनिषदि (याज्ञवल्क्योपनिषदि), बृहज्जाबालोपनिषदि, पैङ्गलोपनिषदि, तारकोपनिषदि, रामोत्तरतापिन्युपनिषदि, मुक्तिकोपनिषदि, गायत्रीरहस्योपनिषदि, वरदोत्तरतापिन्युपनिषदि, सायणभाष्ये, महीधरभाष्यभूमिकायाम्, वराहपुराणे, वायुपुराणे, ब्रह्माण्डपुराणे, स्कन्दपुराणे, महाभारते, श्रीमद्भागवतमहापुराणे, जाबालसंहितायाम्, चरणव्यूहसूत्रभाष्ये, विष्णुपुराणे, रामायणे च प्राप्यन्ते।

एतान् ग्रन्थानतिरिच्य महर्षिणा याज्ञवल्क्येन स्वयं प्रणीतेषु उपदिष्टेषु वा शतपथब्राह्मणे, याज्ञवल्क्यस्मृतौ, बृहद्योगियाज्ञवल्क्यस्मृत्यादिषु तु याज्ञवल्क्यस्य सन्दर्भाः सन्त्येव। गोस्वामितुलसीदासकृते रामचरितमानसे याज्ञवल्क्य-भरद्वाजसंवादो वर्तते, यस्य मूलं रामोत्तरतापिन्युपनिषन्मन्यते।

बृहदारण्यकोपनिषदि वयं महर्षिणा याज्ञवल्क्येन अभिव्यक्तान् अद्वैतवेदान्तस्य अनुपमान् दार्शनिकान् उपदेशान् प्राप्नुमः। पुराणोपनिषन्महाभारतादिग्रन्थेषु याज्ञवल्क्यस्य यद् दार्शनिकं चिन्तनमस्माभिः प्राप्यते, तासामासां सकलोपलब्धीनां कृते महर्षिर्याज्ञवल्क्यः श्लाघनीयो वर्तते। तथैव याज्ञवल्क्यस्मृतौ, महाभारतस्य शान्तिपर्वान्तर्गते जनक-याज्ञवल्क्यसंवादे, अन्यासु कतिपयोपनिषत्सु, शतपथब्राह्मणे, पौराणिकग्रन्थेषु च प्रस्तुतात्तस्य दार्शनिकचिन्तनादस्माकं समग्रमाध्यात्मिकं जगदेव उपकृतमस्ति।

## पूर्वकार्यसमीक्षणं शोधान्तरालश्च

अद्वैतवेदान्तपरम्परायां महर्षेर्याज्ञवल्क्यस्य दार्शनिक्या दृष्टेः समीक्षणाय पूर्वकृतानां केषाञ्चन प्रमुखाणां कार्याणामिह कालक्रमेण सङ्क्षिप्तं पर्यालोचन विधीयते-

याज्ञवल्क्यस्मृतिः (टिप्पणीकारः – वासुदेवशर्मा, १९०९ ई.) इत्याख्यायाः स्मृतेः प्रास्ताविके वासुदेवशर्मणा विदेहजनकस्य सदसि याज्ञवल्क्यस्य अतर्क्यमतिवैभवेन पूर्वपक्षनिराकरणं शुक्लयजुर्वेदस्य वाजसनेयिशाखाप्रवर्तनञ्च समुपवर्णितम्। याज्ञवल्क्य-चरित्र (श्रीधर अण्णाशास्त्री वारे, १८५८ शक.) इति महाराष्ट्रीयभाषया रचिते ग्रन्थे महर्षेर्याज्ञवल्क्यस्य जन्म-काल-विद्याध्ययन-शास्त्रोपदेशादिभिः सह गुरुशिष्यपरम्परा परिचर्चिता। जनकदर्शनम् (रामानन्दगिरिः, २०५० वि.सं.) अस्मिन् विद्यावारिधिप्रबन्धे जनकपुरे ब्रह्मचर्चाकारिणां महर्षीणां मध्ये सकलशास्त्रमर्मज्ञतया योगीश्वरस्य याज्ञवल्क्यस्य जनकस्य ब्रह्मतत्त्वोपदेष्टृगुरुत्वेन प्रामाणिकं वर्णनं लभ्यते। अद्वैतवेदान्तमा याज्ञवल्क्य (आमोदवर्धन कौण्डिन्न्यायन, २०६८ वि.सं.) इत्याख्ये शोधलेखे बृहदारण्यकोपनिषदः सन्दर्भानधिकृत्य महर्षेर्याज्ञवल्क्यस्य अद्वैतवेदान्तीयं चिन्तनं सङ्क्षेपत उपस्थापितं वर्तते। महर्षि-याज्ञवल्क्यः (नाट्यकाव्यम्, अनु. रोहिणीराज तिमिल्सिना, २०७६ वि.सं.) इति सत्यमोहन-जोशी-रचितस्य काव्यस्य भूमिकायां डा. गुरुप्रसादसुवेदिना तथैव संस्कृतानुवादकेन च याज्ञवल्क्यस्य औपनिषददार्शनिकसिद्धान्ता अद्वैतवेदान्तस्य सर्वोत्तमत्वञ्च प्रतिपादितमस्ति।

उपर्युक्तानां टीका-प्रबन्ध-शोधलेखादीनां समीक्षणेन अवगम्यते यद् याज्ञवल्क्यस्य स्मार्ताचार-व्यवहार-शुक्लयजुर्वेदादि-विषयेषु तथा च तस्य ब्रह्मवेत्तृत्व-व्यक्तित्व-विषयेषु विकीर्णतया अध्ययनानि तु उपलभ्यन्ते परन्तु स्मृति-याज्ञवल्क्यगीता-बृहदारण्यकोपनिषदादि-प्रमुखाधारग्रन्थान् समाश्रित्य महर्षेर्याज्ञवल्क्यस्य दार्शनिकी दृष्टिमधिकृत्य साक्षात् सम्पादितं पूर्णाङ्गं शोधकार्यं नैवावाप्यते।

इत्थं विषयेऽस्मिन् विद्यमानं विकीर्णचिन्तनम्, साक्षात् शोधकार्यस्य च अनुपलब्धता एव अस्य 'शोधान्तरालः' (Research Gap) वर्तते। अमुमेव शोधान्तरालं/रिक्ततां पूरयितुं याज्ञवल्क्यीयाया दार्शनिकदृष्टेः प्रामाणिकं मूल्यमाङ्कयितुममुष्य शोधलेखस्य प्रयोजनवत्ता संलक्षितमस्ति।

## उद्देश्यं समस्याश्च

महर्षेर्याज्ञवल्क्यस्य दार्शनिकदृष्टेः सम्यक् चिन्तनं दार्शनिकप्रभावस्य च समीक्षा साम्प्रतं यावत् सम्यग् न विहितेति एव मूलसमस्या वर्तते। अतः तस्य दार्शनिकदृष्टेः समुपस्थापनेन समीक्षणेन च सहैव परवर्तिसमये तस्य दार्शनिकप्रभावस्य चर्चा अध्ययनस्य मूलमुद्देश्यं वर्तते। अस्याध्ययनस्य शोधप्रश्नानां कल्पनमेवं कर्तुं शक्यते–

क) महर्षिर्याज्ञवल्क्यः कोऽस्ति ?

ख) तस्य दार्शनिकी दृष्टिः कीदृशी वर्तते ?

ग) तस्य दार्शनिकविचारधारायाः समीचीना समीक्षा कीदृशी भवितुं शक्नोति ?

## संवादशास्त्रार्थयोः प्रसङ्गाः

महर्षेर्याज्ञवल्क्यस्य दार्शनिकीं दृष्टिम्, अद्वैतपरां वैचारिकीमुच्चताञ्च बोद्धुं बृहदारण्यकोपनिषदि वर्णिताः तस्य संवादाः शास्त्रार्थप्रसङ्गाश्च सर्वेभ्यः सुदृढा ऐतिहासिकप्रमाणाः सन्ति। याज्ञवल्क्येन केवलमेकपक्षीय उपदेश एव न प्रदत्तः, अपितु तत्कालीनसमाजस्य प्रखरतमानां विदुषाम्, विदुषीणाम्, राजर्षीणाञ्च बौद्धिका आव्हानाः, तर्काः, शङ्काश्च अकाट्ययुक्तिभिः समाहिताः। अमृतत्वस्यान्वेषणे केन्द्रितात् कौटुम्बिकसंवादाद् आरभ्य राजसभासु विहिता बहुपक्षीया शास्त्रग्रन्थिग्रथिता दार्शनिकद्वन्द्वान् यावद् यच्चिन्तनमवाप्यते, तन्न केवलं तस्य ब्रह्मिष्ठव्यक्तित्वमुद्धाटयन्ति, अपितु अद्वैतवेदान्तस्य गूढतमान् सिद्धान्तान् सरलतया तार्किकरीत्या च बोधयन्तीं तस्याद्वितीयशैलीमपि प्रमाणीकुर्वन्ति।

### मैत्रेयी-याज्ञवल्क्यसंवादः (अमृतत्वस्यान्वेषणम्)

बृहदारण्यकोपनिषदो द्वितीयाध्यायस्यान्तर्गतं चतुर्थं ब्राह्मणम्, चतुर्थाध्यायस्यान्तर्गतञ्च पञ्चमं ब्राह्मणं च 'मैत्रेयीब्राह्मणम्' इति नाम्ना युक्तं वर्तते। तत्र याज्ञवल्क्यस्यास्य ज्येष्ठभार्याया मैत्रय्या च मध्ये य औपनिषदः संवादोऽस्ति, तस्मिन्नद्वैतदर्शनस्य कतिपयेषां सैद्धान्तिकपक्षाणामनुपमा प्रस्तुतिः प्राप्यते।

याज्ञवल्क्येन मैत्रेयीं प्रति 'अहं तव कात्यायन्याश्च मध्ये सम्पत्तिविभाजनं कृत्वा संन्यस्तो भवामि' इति कथनादारब्धमेतन्मैत्रेयीब्राह्मणमद्वैतदर्शनस्य सिद्धान्तप्रतिपादनदृष्ट्या अत्यन्तं महत्त्वपूर्णं वर्तते– **मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति** (बृहदारण्यकोपनिषद् २/४/१)। याज्ञवल्क्यस्य तस्य प्रस्तावस्य प्रतिक्रियायां मैत्रय्या अनुपमः प्रतिप्रश्न उपस्थापितः। सा जगाद– **"यन्नु म**

**इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति ?"** (वैभवेन सम्पन्ना सकला पृथिवी एव यदि मम भवेत्, तर्हि अपि तेनाहममृतत्वं प्राप्तुं शक्नोमि वा ?)

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी
वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति। (बृहदारण्यकोपनिषद् २/४/२)
अमृतत्वस्य तु नाशास्ति वित्तेन। (बृहदारण्यकोपनिषद् २/४/२)
सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्याम्। (बृहदारण्यकोपनिषद् २/४/३)

भौतिकसम्पत्त्यामृतत्वस्य आशा कर्तुं न शक्यत इति निश्चयात्मकं समाधानं याज्ञवल्क्यात् प्राप्ता मैत्रेयी ब्रवीति– **"येनाहं नामृता स्यां किमहं तेन कुर्याम् ?"** (येन अहं अमरा भवितुं न शक्नोमि, तादृशं वित्तं गृहीत्वा अहं किं करवाणि ?)। इतः परं याज्ञवल्क्यो मैत्रेय्यै तत्त्वोपदेशं करोति।

सर्वाणि वस्तूनि आत्मनः कृते एव प्रियाणि भवन्तीति कथयता याज्ञवल्क्येन आत्मनः परमप्रेमास्पदत्वस्य अनुपमः सन्दर्भ उपदेशक्रमे तत्र उपस्थापितोऽस्ति– **न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति... न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति** (बृहदारण्यकोपनिषद् २/४/५)। अस्मिन्नेव क्रमे आत्मतत्त्वस्य साक्षात्कारः करणीयः, तदर्थं च श्रवणादिसाधनानामनुष्ठानं विधातव्यम्, तेनैव च सर्वविज्ञानं भवतीत्यपि उपदेशो वर्तते–

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो
वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्। (बृहदारण्यकोपनिषद् २/४/५)

द्वैतभावे एव समस्तानामिन्द्रियाणां ज्ञानप्रक्रिया प्रारब्धा भवति। अत आत्मविदे सार्वात्म्यभावेन आत्मभिन्नं किमपि न तिष्ठति। अत एव स द्वैतभावादुपरि उत्थाय अद्वैतभावे आरूढो भवति। तस्यामवस्थायां तस्य कृते किमपि द्वितीयं ज्ञेयं वस्तु अवशिष्टं न भवति– **यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति** (बृहदारण्यकोपनिषद् २/४/१४)। अत एव खलु आत्मा एव श्रवणीयः, मननीयः, निदिध्यासितव्यश्च (ध्येयश्च) वर्तते। अस्य विज्ञानेन सर्वं विदितं भवतीति च अस्याद्वितीयत्वादेव सिद्ध्यति। वस्तुतो द्वैतभावे एव सुख-दुःखयोरनुभूतिर्जायते। अद्वैतानुभूतौ तु सुख-दुःखयोः समग्रा आरोहावरोहाः स्वयमेव विनश्यन्ति। एतेन सह कस्यापि अन्यस्य वस्तुन आत्मसत्तामतिरिच्य पृथक् सत्ताया अभावात् सर्वमात्मैवेति उपदेशमपि याज्ञवल्क्यो मैत्रेय्यै ददाति– **इदँ सर्वं यदयमात्मा** (बृहदारण्यकोपनिषद् २/४/६)।

### राजर्षेः जनकस्य सभा बहुपक्षीयः शास्त्रार्थसंवादश्च

बृहदारण्यकोपनिषदः तृतीयेऽध्याये याज्ञवल्क्यकाण्डं वर्तते, यत्र वैदेहस्य जनकस्य ब्रह्मसभायाः शास्त्रार्थसन्दर्भः समाहितो दृश्यते। महति यज्ञे सम्पन्ने वैदेहजनकस्य मनसि यज्ञे आमन्त्रितेषु ब्राह्मणेषु को नु खलु 'अनूचानतमः' इति जिज्ञासा जायते। ततः शृङ्गयोः दश-दशपादपरिमितसुवर्णखचिताः सहस्रधेनवः पारितोषिकरूपेण सज्जीकृत्य **'यः वः ब्रह्मिष्ठः स एता गा उदुजताम्'** (युष्मासु यो ब्रह्मिष्ठः, स एता गा नयतु) इति राजा आदिशति।

याज्ञवल्क्यः स्वशिष्यं सामश्रवसं ता गा नेतुमादिशति। तद्दृष्ट्वा अन्येषु ब्राह्मणेषु क्रुद्धेषु सत्सु याज्ञवल्क्येन **"नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्मः"** (ब्रह्मिष्ठाय अस्माकं नमस्कारः, वयं तु केवलं गोकामाः स्मः) इति वचनान्तरमेव शास्त्रार्थः प्रारब्धो भवति– **तान् होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजताम्... नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा वयँ स्म इति तँ ह तत एव प्रष्टुं दध्रे होताश्वलः** (बृहदारण्यकोपनिषद् ३/१/२)।

जनकस्य तस्यां सभायां बहवो विद्वांस ऋषयो याज्ञवल्क्यं प्रति प्रश्नान् कुर्वन्ति, सहैव विदुषी गार्गी अपि वारद्वयं यावत् त्रीन् प्रश्नानुपस्थापयति। सम्पूर्णेऽध्याये नवसु ब्राह्मणेषु एष शास्त्रार्थः समाहितोऽस्ति। याज्ञवल्क्यं प्रति वैदेहजनकस्य होरश्वलस्य मृत्युविषयकेण प्रश्नेन आरब्ध एष शास्त्रार्थ आर्तभाग-भुज्यूषस्त-कहोलाः, गार्गी, आरुणिः, पुनः गार्गी इति क्रमेण गत्वा शाकल्येन सह प्रवृत्ते प्रश्नोत्तरे परिसमाप्तो भवति।

यज्ञः, सर्वान्तर आत्मा, आत्मज्ञानम्, सर्वाधिष्ठानम्, अन्तर्यामी, अक्षरम्, अक्षराधिगमः, देवता, औपनिषदः पुरुष इत्यादिनां विषयाणामनेकेषां प्रश्नानामुत्तराणां च परितो वैदेहजनकस्य तस्यां शास्त्रार्थसभायामद्वैतवेदान्तस्य प्रभूतं सैद्धान्तिकं रहस्यमुद्घाटितं भवति।

उषस्तस्य सर्वान्तरात्मविषयिणीं जिज्ञासां समादधानो याज्ञवल्क्यः कथयति– **एष त आत्मा सर्वान्तरः** (बृहदारण्यकोपनिषद् ३/४/२) एष तव आत्मा एव सर्वान्तर इत्यभिप्रायः। समग्र इन्द्रियार्थसन्निकर्षजन्यो ज्ञानप्रपञ्च एतेनैव द्रष्ट्रा साक्षिणा आत्मना प्रकाशितोऽस्ति, परञ्च अस्या दृष्टेर्द्रष्टा द्रष्टुं न शक्यते। "**न दृष्टेर्द्रष्टारं पश्येः न श्रुतेः श्रोतारं शृणुयाः न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीयाः**" इति कथयता याज्ञवल्क्येन दृष्टिरपि द्रष्टुः स्वरूपभूता एवेति द्रष्टृ-दृष्ट्योर्भेदो नास्तीति प्रतिपादितम्। स तमेव द्रष्टृरूपमात्मानं सर्वान्तरं तद्भिन्नं च समग्रं कार्यकारणात्मकं देहादिकं प्रपञ्चं नश्वरमिति उपदिशति– **स होवाचोषस्तश्चाक्रायणो... एष त आत्मा सर्वान्तरोऽन्यदार्तम्** (बृहदारण्यकोपनिषद् ३/४/२)। एवं प्रकारेण आत्मभिन्नस्य नश्वरत्वं तथा द्रष्टृ-दृष्ट्योरभेदं प्रदर्शयन् सोऽद्वैतवेदान्तप्रतिपाद्यं सार्वात्म्यभावम्, आत्मनो ज्ञानरूपत्वं तथा शरीरादिप्रपञ्चस्य मिथ्यात्वञ्च निरूपयति।

पञ्चमे कहोलब्राह्मणे त्रिविधाया एषणाया सन्दर्भः समागतोऽस्ति। अशनाया-पिपासा-शोक-मोह-जरा-मृत्युभ्योऽतीतं सर्वान्तरमात्मानं विदित्वा ज्ञानिना पुत्रैषणा, वित्तैषणा, लोकैषणा च पूर्णतः परित्याज्या इति उपदेशं याज्ञवल्क्यः कहोलाय यच्छति– **"कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति। एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति"** (बृहदारण्यकोपनिषद् ३/५/१)।

"पुत्रैषणा मानवं संसारस्य गभीरे गर्ते प्रक्षिपति, वित्तैषणा च तं निर्लज्जं भिक्षुकं करोति, ततः परं लोकैषणा तु मानवं नृशंसं हिंस्रकं पशुमिव परिवर्तयति" (भट्टराई शरत्कुमारः, परमसत्य, पृ. ९४)। गार्ग्या अधिष्ठानविषयकजिज्ञासायाः समाधानक्रमे गार्गीब्राह्मणे अद्वैतवेदान्तसम्मतं ब्रह्मणः सर्वाधिष्ठानत्वं प्रतिपादितं वर्तते। एष पार्थिवो धातुसमुदायो जले ओतप्रोत (व्याप्तः) अस्ति, परञ्च जलं कस्मिन् ओतप्रोतमस्तीति प्रश्नादारभ्य जलं वायौ ओतप्रोतमिति याज्ञवल्क्य उत्तरं ददानो ब्रह्मलोकस्य अधिष्ठानत्वं यावत् उपादिशत्। ब्रह्मलोकस्यापि अधिष्ठानविषयकं प्रश्नं कुर्वतीं गार्गीं प्रति **'अतिप्रश्नं मा कार्षीः'** इति वदन् स ताम् भर्त्सितवान् अस्ति– **अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदँ सर्वमप्स्वोतं च प्रोतं च... गार्गि मतिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम** (बृहदारण्यकोपनिषद् ३/५/१)।

सप्तमे ब्राह्मणे उद्दालकारुणेरन्तर्यामिविषयके प्रश्ने (बृहदारण्यकोपनिषद् ३/७/१) याज्ञवल्क्येन उपदिष्ट आत्मनोऽन्तर्यामित्वस्य सन्दर्भश्च अत्यन्तं गभीरो वर्तते। याज्ञवल्क्योऽन्तर्यामिणो निरूपणक्रमे पृथिव्यादि-समग्रप्रपञ्चस्य कार्यव्यापारः तत्तद्वस्तुषु अन्तर्यामिरूपेण व्यापकीभूतस्य आत्मन एव सान्निध्येन प्रचलति, परञ्च स आत्मा प्रपञ्चधर्मेभ्यो रहितोऽस्तीति उपदिशति (बृहदारण्यकोपनिषद् ३/७/३–२३)।

पश्चादष्टमे ब्राह्मणेऽपि गार्गी पुनः प्रश्नद्वयं प्रष्टुमनुमतिं गृहीतवती– **सा होवाचाहं वै त्वा याज्ञवल्क्य... द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति** (बृहदारण्यकोपनिषद् ३/८/२) इति। गार्ग्या उपस्थापितस्य अधिष्ठानविषयकस्य प्रश्नस्योत्तरे याज्ञवल्क्यः पृथिव्यादीनां सर्वेषामधिष्ठानमाकाशम्, आकाशस्यापि अधिष्ठानत्वेन 'अक्षरब्रह्म' वर्णितवान् अस्ति (बृहदारण्यकोपनिषद् ३/८/३–४)। अधिष्ठानविषयकस्यैव द्वितीयस्य प्रश्नस्य उत्तरे अक्षरस्य अस्थूलत्वानणुत्वादीनां चर्चां कुर्वन् सर्वविशेषणराहित्येन तदक्षरं यो जानाति तस्य ब्राह्मणत्वम्, यश्च न जानाति तस्य कृपणत्वमित्यपि तत्र याज्ञवल्क्येन उपदिष्टं वर्तते (बृहदारण्यकोपनिषद् ३/८/६–१०)। तत्र तेन आत्मनोऽद्वितीयत्वमपि निरूपितम्। सहैव अक्षरं दृष्टेरविषयभूतं द्रष्टारं प्रतिपादयता तेन अक्षरस्वरूपस्य उपदेशोऽपि गार्ग्यै दत्तो दृश्यते (बृहदारण्यकोपनिषद् ३/८/११)। एतस्याक्षरब्रह्मणो विषये वेदान्तशास्त्रे यत्र तत्र एतादृशमेव वर्णनं प्राप्यते।

नवमे ब्राह्मणे शाकल्यस्य देवतानां सङ्ख्याविषयकात् प्रश्नादारब्धः संवादः प्रतिष्ठाविषयकं प्रश्नोत्तरं प्राप्य परिसमाप्तो भवति (बृहदारण्यकोपनिषद् ३/९/१–२६)। अग्नि-वाण्यादीनां प्रतिष्ठाविषये प्रश्नं कुर्वन् कुर्वन् शाकल्यः सर्वात्मकहृदयस्य प्रतिष्ठाविषयकमतिप्रश्नं चकार। ततः प्रतिप्रश्नरूपेण याज्ञवल्क्येन औपनिषदपुरुषविषयके प्रश्ने कृते सति उत्तरं दातुमसमर्थस्य शाकल्यस्य मूर्धा व्यपतत्– **"तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति। तँ ह न मेने शाकल्यस्तस्य ह मूर्धा विपपातापि"** (बृहदारण्यकोपनिषद् ३/९/२६)।

शास्त्रार्थस्य उपर्युक्तान् सन्दर्भान् समीक्ष्य दर्शनेऽद्वैतवेदान्तस्य सैद्धान्तिकप्रस्तुतौ याज्ञवल्क्यस्य वैशिष्ट्यं पृथक् चिन्तनशैली च उपलभ्यते। आत्मनः सर्वाधिष्ठानत्वम्, ज्ञानस्वरूपत्वम्, अद्वितीयत्वम्, निर्विशेषत्वम्, अक्षरत्वम्, सर्वात्मकत्वमित्यादयोऽद्वैतवेदान्तगताः सैद्धान्तिक्यो मान्यता याज्ञवल्क्येन यथावन्निरूपिताः प्राप्यन्ते। निरूपणस्य तच्छैली अपि अत्युत्तमा प्रतीयते। शास्त्रीयजिज्ञासायामतिप्रश्नो निषिद्ध इति नियमस्य बोधः शास्त्रार्थसन्दर्भस्य अपरं वैशिष्ट्यं वर्तते।

**जनक–याज्ञवल्क्यसंवादः (स्वयञ्ज्योतिरात्मा)**

बृहदारण्यकोपनिषदः चतुर्थस्याध्यायस्य चतुर्षु ब्राह्मणेषु जनक-याज्ञवल्क्ययोः संवादो वर्तते। वाग्ब्रह्म-प्राणब्रह्मादीनां विविधा उपासनाः फलानि च, आदित्यादिपञ्चज्योतींषि, आत्मनः स्वयञ्ज्योतिरूपता एवञ्च असङ्गता, मुमूर्षोर्दशा, मोक्षमार्गः, आत्मज्ञस्य स्थितिः, निर्भयता इत्यादीनां विषयाणां वर्णनं तत्र समागतमस्ति।

शिलिनपुत्रः जित्वा, शुल्बपुत्र उदङ्क इत्यादयो विद्वांसः वाक्-प्राणादीन् ब्रह्म इति मत्वा यदुपदिष्टवन्त आसन्, तद् वैदेहजनकेन श्रुतमासीत् (बृहदारण्यकोपनिषद् ४/१/२), परञ्च वाक्-प्राणादय एव तेषामायतनमाकाशश्च प्रतिष्ठा वर्तत इति तेन न ज्ञायते स्म। जनकाय तस्मै तेषामायतनं प्रतिष्ठासहितामुपासनां फलञ्च सहैव याज्ञवल्क्य उपदिष्टवान् अस्ति (बृहदारण्यकोपनिषद् ४/१/३–७)।

ततो वैदेहजनकेन गुरूपसत्तौ कृतायां सत्यां याज्ञवल्क्यः तत्त्वोपदेशं विहितवान् अस्ति– **जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति** (बृहदारण्यकोपनिषद् ४/२/१)। उपदेशक्रमे प्राणात्मभूतस्य विदुषः सर्वात्मकताया वर्णनान्तरं जनकेन अभयपदं प्राप्तमिति सन्दर्भः प्रस्तुतो वर्तते। **"अभयं वै जनक प्राप्तोऽसि"** (निश्चयेन भो जनक ! त्वया अभयं प्राप्तमस्ति) इति कथनान्तरं जनकोऽभयस्य अनुभूतिं कुर्वन् विदेहराज्येन सह स्वमपि गुरुवे याज्ञवल्क्याय समर्पितवान् अस्ति– **अभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः। स होवाच जनको वैदेहोऽभयं त्वा गच्छताद् याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा**

**अयमहमस्मि** (बृहदारण्यकोपनिषद् ४/२/४)। ततो जनकस्य प्रश्नानां याज्ञवल्क्यस्य च उत्तराणां क्रमेऽन्येषां बहूनां महत्त्वपूर्णानां शास्त्ररहस्यानामुद्घाटनं सञ्जातमस्ति।

याज्ञवल्क्यो वैदेहजनकं प्रति व्यवहारोपयोगिनां आदित्य-चन्द्राग्नि-वाणीज्योतिषां चर्चां कृत्वा आत्मज्योतिर्माध्यमेन आत्मस्वरूपस्यापि वर्णनं चकार (बृहदारण्यकोपनिषद् ४/३/२–६)। अस्मिन्नेव क्रमे स्वाप्निकावस्थायामादित्यादिज्योतिषां विषयप्रकाशकानामिन्द्रियादीनाञ्च अभावेन मनःसृष्टान् स्वाप्निकपदार्थान् आत्मा एव अन्तःकरणद्वारा प्रकाशयतीति प्रतिपादितम्– **न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते** (बृहदारण्यकोपनिषद् ४/३/१०)। स्वयञ्ज्योतिरात्मा अस्तीति स्वप्नानिदर्शनेन प्रदर्शितम्। एवंप्रकारेण आत्मनः स्वयञ्ज्योतिष्ट्वं सिद्ध्यति– **'सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवति'** (बृहदारण्यकोपनिषद् ४/३/१४ शाङ्करभाष्यम्)।

सुषुप्ति-स्वप्न-जाग्रतामुपभोगादात्मनोऽसङ्गताया निःशोकतायाश्च निरूपणं सोऽकरोत्– **...तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति** (बृहदारण्यकोपनिषद् ४/३/१५–१७), अपि च सुषुप्तौ द्रष्टुरात्मनोऽद्वितीयत्वं तथा आत्मरूपत्वेन दृष्टेरविनाशित्वमपि याज्ञवल्क्येन तत्र प्रतिपादितं वर्तते– **"नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वत्वात्। न तु तद्द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्यत्"** (बृहदारण्यकोपनिषद् ४/२/२३)।

ततो म्रियमाणस्य जनस्य अवस्थायाः, विच्छित्तेः, देहान्तरग्रहणस्य च विवरणं वर्तते (बृहदारण्यकोपनिषद् ४/३/३६ – ४/४)। कामनानुरूपं जीवात्मनः शुभाशुभगतीनां वर्णनमपि तत्र विद्यते (बृहदारण्यकोपनिषद् ४/४/५–६), अपरपक्षे च आत्मकामस्य ब्रह्मविदः समग्राः कामनाः समूलं विनश्य स ब्रह्मैव सन् प्राणानामुत्क्रमणं विनैव ब्रह्मस्वरूपं मोक्षं अभिसम्पद्यत इत्युपदेशो याज्ञवल्क्येन जनकाय विहितोऽस्ति– **योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति** (बृहदारण्यकोपनिषद् ४/४/६)।

**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः।**
**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति।।** (बृहदारण्यकोपनिषद् ४/४/७)।

आत्मतत्त्वसाक्षात्कारस्य साधनत्वं मनसि वर्तते इति सङ्केतयन्नद्वितीय आत्मनि नानात्वं (भेदम्) पश्यतः जीवस्य दुर्गतिं (मृत्युमुखापन्नत्वम्) तेन वर्णितम्–

**मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।**
**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।** (बृहदारण्यकोपनिषद् ४/४/१९)

सहैव अनेकेषां शास्त्राणामनुध्यानमात्रेण चर्चामात्रेण वा आत्मानुभूतिर्न जायते, सा तु केवलं वाचः श्रम एव भवतीति तथ्यं याज्ञवल्क्येन तत्र अभिव्यक्ता दृश्यते–

**तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्रह्मणः।**
**नानुध्यायाद् बहुन् शब्दान् वाचो विग्लापनं हि तदिति।** (बृहदारण्यकोपनिषद् ४/४/२१)

आत्मानुभूतेरेकस्य साधनस्य रूपेण तत्र संन्यासस्य चर्चां कुर्वता तेन आत्मस्वरूपस्य आत्मज्ञस्य स्थितेश्चापि वर्णनं विहितं वर्तते। अन्ते च ब्रह्मविदो महिमवर्णनं समागतमस्ति। राजा जनकः कृतकृत्यो भूत्वा "**सोऽहं भगवते विदेहान् ददामि मां चापि सह दास्याय**" (अहं पूज्याय गुरुवे समग्रं विदेहराज्यं ददामि, आत्मानञ्च भवतो दास्यभावेन समर्पयामि) इति वदन् गुरुं प्रति पूर्णतः समर्पितो भवति– **एष नित्यो महिमा... एष ब्रह्मलोकः सम्राडेन**

**प्रतपितोऽसीति होवाच याज्ञवल्क्यः, सोऽहं भगवते विदेहान् ददामि मां चापि सह दास्यायेति** (बृहदारण्यकोपनिषद् ४/४/२३)।

**स्मृतिग्रन्थेषु दार्शनिकविचाराः**

याज्ञवल्क्यकृतेषु स्मृतिग्रन्थेष्वपि तस्य दार्शनिकविचाराः प्रकटीभूता सन्ति। याज्ञवल्क्यस्मृतिनामकस्य स्मृतिग्रन्थस्य विशेषतो यतिधर्मप्रकरणेऽद्वैतवेदान्तस्य प्रभूताः सैद्धान्तिकाः पक्षाः समाविष्टा दृश्यन्ते। उक्तप्रायश्चित्ताध्यायान्तर्गतस्य यतिधर्मप्रकरणे आत्म-जीव-जगतां स्वरूपम्, पुनर्जन्म, जीवस्य गतिः, मोक्षः, सृष्टेः प्रक्रिया, तत्त्वसाक्षात्कारस्य साधनानि, आत्मोपासना, योगाभ्यास इत्यादयोऽद्वैतवेदान्तस्य दार्शनिकाः पक्षाः सङ्क्षेपेण विवेचिताः सन्ति।

बाह्यचित्तवृत्तीनां निरोधेन जायमाना या निःश्रेयसस्य सिद्धिरस्ति, स एव परमो धर्म इति कथयता ब्रह्मर्षिणा याज्ञवल्क्येन इज्यादिषु (यज्ञादिषु) कर्मसु सर्वश्रेष्ठधर्मरूपेण आत्मदर्शनं सङ्केतितमस्ति–

**इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।**
**अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम्।।**

इज्यादीनां कर्मणामयमेव परमो धर्मो यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनं याथातथ्यज्ञानम्। (याज्ञवल्क्यस्मृतिः, आचाराध्यायः ८, मीताक्षराव्याख्या)

चतुःप्रकारका अपि आश्रमिणः श्रवणादिसाधनानामवलम्बनपूर्वकमात्मजिज्ञासां कुर्युरिति याज्ञवल्क्येन प्रतिपादितमस्ति–

**स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु।**
**द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः।।** (याज्ञवल्क्यस्मृतिः ३/४/१९१)

आत्मनो जगत्कारणत्वम्, जीवस्य भेदबुद्धिः, आत्मनः संसारस्य च स्वरूपम्, संसरणमार्गः, मोक्षमार्गः, आत्मज्ञानस्य आवश्यकता, अमृतत्वप्राप्तेरुपाय इत्यादीनां विषयाणां याज्ञवल्क्येन स्वकीये स्मृतिग्रन्थे सम्यङ्निर्देशः कृतोऽस्ति।

अपरस्मिन् बृहद्योगियाज्ञवल्क्यस्मृतिग्रन्थेऽपि अद्वैतवेदान्तस्य दार्शनिकचिन्तनस्य सुन्दरी प्रस्तुतिः प्राप्यते। स्वकर्तव्यकर्मणामनुष्ठाता कश्चिदपि आश्रमी वेदान्तस्य परिज्ञानेन आत्मनः सम्यग्बोधं विधाय मुक्तो भवितुं शक्नोतीति तत्रोपदिष्टमस्ति–

**ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तथा।**
**आत्मज्ञानेन मुच्यन्ते यत्र तत्राऽऽश्रमे रताः।।**
**स्वकर्मणामनुष्ठानात् सम्यगात्मनिदर्शनात्।**
**वेदान्तानां परिज्ञानाद् गृहस्थोऽपि हि मुच्यते।।** (बृहद्योगियाज्ञवल्क्यस्मृतिः ११/४४–४५)

ज्ञानसाधकेन विरक्तेन मुमुक्षुणा अपि नियतकर्मणां त्यागो न करणीयः, कर्मसंन्यासस्य तात्पर्यं च कर्मफलत्याग एवेति वेदान्तस्य यत् सैद्धान्तिकं चिन्तनं वर्तते, तस्य सङ्केतो याज्ञवल्क्येन अस्यां स्मृतौ पूर्वमेव कृतः प्राप्यते–

**कर्मसंन्यासयोगेन ब्राह्मणः सिद्धिमाप्नुयात्।**
**कर्मणां नियतानान्तु त्यागो नैव विधीयते।।**

**तेषां कर्मफलत्यागः स त्याग इति कीर्त्यते।**
**ब्रह्मप्रधानकर्मस्था न सीदन्ति कदाचन।।** (बृहद्योगियाज्ञवल्क्यस्मृतिः ११/४७–४८)

## सन्दर्भसमीक्षा तुलनात्मकं विश्लेषणञ्च

बृहदारण्यकोपनिषदो मैत्रेयीब्राह्मणे स्वकीयया ज्येष्ठभार्यया मैत्रेय्या सह संवादे तत्रोपदेशक्रमे च भौतिकसम्पत्त्या अमृतत्वस्य आशाराहित्यम्, आत्मप्रियत्वेन सर्वप्रियत्वम्, श्रवणादीनामात्मतत्त्वसाक्षात्काराय साधनत्वमित्यादयोऽद्वैतवेदान्तस्य दार्शनिकाः पक्षा अभिव्यक्ताः सन्ति। आत्मतत्त्वसाक्षात्कारस्य साधनरूपेण येषां श्रवण-मनन-निदिध्यासनानां चर्चा महर्षिणा कृतास्ति, तमेव विषयं परवर्तिभिरद्वैताचार्यैरपि अनुसृतमनुभूयते। यथा–

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः।।** (विद्यारण्यस्वामी, विवरणप्रमेयसङ्ग्रहः, पृ.सं. १)

वैदेहजनकस्य होतुरश्वलस्य, जरत्कारुगोत्रीयस्य ऋतुभागपुत्रस्य आर्तभागस्य, लह्यनप्तुर्लाह्यपुत्रस्य लाह्यायनेर्भुज्योः, चक्रपुत्रस्य चाक्रायणस्य उषस्तस्य, कुषीतकपुत्रस्य कौषीतकेयस्य कहोलस्य, वचक्नुदुहितुर्वाचक्नव्या गार्ग्याः, अरुणपुत्रस्य उद्दालकारुणेरेवञ्च शकलपुत्रस्य विदग्धशाकल्यस्य च प्रश्नानामुत्तरेषु याज्ञवल्क्येन अद्वैतवेदान्तस्य अनेकेषां सैद्धान्तिकानां पक्षाणां विवेचनं विहितं वर्तते। तेषु प्रश्नोत्तरेषु आत्मनः सर्वान्तरत्वम्, सर्वाधिष्ठानत्वम्, अद्वितीयत्वम्, द्रष्टृत्वम्, दर्शनाभिन्नत्वमित्यादिविषयाणां सूक्ष्मं विश्लेषणं प्राप्यते, अपरपक्षे च तद्व्यतिरिक्तस्य समग्रस्यापि प्रपञ्चस्य नश्वरत्वमपि तत्रैव निरूपितं विद्यते।

जनकस्य सभायामनूचानतमो विद्वान् भूत्वापि याज्ञवल्क्योऽनुचानमानी (अभिमानी) न दृश्यते। ब्रह्मिष्ठाय प्रदातुं पारितोषिकरूपेण सज्जीकृता गा नेतुं याज्ञवल्क्येन स्वशिष्यः सामश्रवाः तु आदिष्टः परन्तु स्वस्मिन् ब्रह्मिष्ठतायाः अभिमानमकृत्वा **"ब्रह्मिष्ठाय नमस्कुर्मो गोकामा वयँ स्मः"** (बृहदारण्यकोपनिषद् ३/१/२) इति वदन् स विनम्रतां प्राकटयत्। वस्तुतो य आत्मानं ब्रह्मिष्ठं तत्त्वविदं वा घोषयति, तेन तत्त्वं ज्ञातमेव न भवति। तदात्मभिन्नत्वेन अवेद्यम्, प्रमातृ-प्रमाणादित्रिपुटीराहित्येन बोद्धव्यम्, अवाङ्मनसगोचरं च यत्तत्त्वं वर्तते, तस्य बोधः तादृश्या घोषणया प्रमाणीकर्तुं शक्यो विषय एव नहि–

**यस्यामतं तस्य मतं मतं यस्य न वेद सः।**
**अविज्ञातं विजानतां विज्ञातमविजानताम्।।** (केनोपनिषद् २/३)

एतां युक्तिपूर्णां श्रौतीं मान्यतां याज्ञवल्क्यः पूर्णतः पालितवान् दृश्यते। सहैव **"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः... प्रमाणं परमं श्रुतिः"** इति आस्तिकदर्शनस्य सरण्यामपि (परम्परायामपि) महर्षेर्याज्ञवल्क्यस्य पूर्णं समर्थनमनुभूयते (बृहद्योगियाज्ञवल्क्यस्मृतिः १२/१)।

ब्रह्मचर्ये ब्रह्मचर्चायां वा सहभागिभ्यां पूर्वपक्षोत्तरपक्षाभ्यामुभाभ्यामेव चर्चाविषयानुकूलं ज्ञानम्, योग्यता, शिष्टता, मर्यादा च अवश्यमेव पालनीया भवन्ति। यदि न पाल्येत, तर्हि शाकल्यवत् कश्चन दुष्परिणामो भोक्तव्यो भवेदिति शिक्षा याज्ञवल्क्य-शाकल्ययोः शास्त्रार्थगतया आख्यायिकया दत्ता वर्तते (औपनिषद पुरुष, पृ.सं. ११२)। तत्त्ववेत्तारं प्रति प्रश्नस्य औचित्यानौचित्यं विचार्यैव अवधानतापूर्वकं (सावधानतया) प्रश्नः करणीय इति प्राश्निकस्य (प्रष्टुः) मर्यादायाः सङ्केतोऽत्र उपलभ्यते। तत्त्वविदा सह शास्त्रविमर्शसमये अतिप्रश्नो यत्किमपि असङ्गतप्रश्नकरणं वा निषिद्धमस्तीति तथ्यमत्र स्पष्टीभूतं वर्तते। एवंप्रकारेण अनया आख्यायिकया शास्त्रार्थस्य आचारप्रदर्शनं ब्रह्मविद्यायाः महिमा च सूच्येते– **सैषा आख्यायिका आचारार्थं सूचिता विद्यास्तुतये चेह** (बृहदारण्यकोपनिषद् ३/९/२६

शाङ्करभाष्यम्)। शाकल्यं प्रति याज्ञवल्क्यः **"तं त्वौपनिषदं पुरुषं पृच्छामि"** (बृहदारण्यकोपनिषद् ३/९/२६) इति वदन् आत्मानम् 'औपनिषद पुरुषः' इति कथितवान् अस्ति। अनेन आत्मन उपनिषन्मात्रगम्यत्वं (केवलं उपनिषद्भिरेव ज्ञेयत्वम्) सङ्केतितं भवति– **स्वेनैवात्मना व्यवास्थितो य औपनिषदः पुरुषोऽशनायादिवर्जित उपनिषत्स्वेव विज्ञेयो नान्यप्रमाणगम्यः, तं त्वा त्वां विद्याभिमानिनं पुरुषं पृच्छामि** (बृहदारण्यकोपनिषद् ३/९/२६ शाङ्करभाष्यम्)।

**"वेदान्तो नाम उपनिषत्प्रमाणम्"** इति कथयन्तोऽर्वाचीना आचार्या अपि याज्ञवल्क्यस्य अस्यैव तथ्यस्य अनुकरणं कृतवन्तः प्राप्यन्ते– **वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च** (वेदान्तसारः ३, योगीन्द्रः सदानन्दः)।

उषस्त-कहोलयोः समानाभासयोः प्रश्नयोरपि याज्ञवल्क्य आत्मनो विषये भिन्नं भिन्नमुत्तरं दत्तवान् अस्ति–

उषस्तस्य प्रश्न : यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वन्तरस्तन्मे व्याचक्ष्व। (बृहदारण्यकोपनिषद् ३/४/१)

कहोलस्य प्रश्न : यदेव साक्षादपरोक्षाद् ब्रह्मा य आत्मा सर्वन्तरस्तन्मे व्याचक्ष्व। (बृहदारण्यकोपनिषद् ३/५/१)

कहोल उषस्तस्य प्रश्ने 'यत्' इत्यस्मात् परं 'एव' इति योजयित्वा यदेव साक्षादपरोक्षाद् ब्रह्म सर्वान्तर आत्मा अस्ति, तस्यैव व्याख्यां करोतु इति याज्ञवल्क्यं प्रार्थितवान् अस्ति। उषस्तये याज्ञवल्क्यः श्रोत्रब्रह्म-मनोब्रह्मादि-देहेन्द्रियाद्युपाधिभिरुपहितं संसारिणं गौणमात्मानमुपदिष्टवान् अस्ति, अपरपक्षे च कहोलाय उपाधिरहितमगौणं शुद्धं प्रत्यगात्मानमुपदिष्टवान् अस्ति– **यद् ब्रह्म साक्षादव्यवहितं केनचिद् द्रष्टुपरोक्षादगौणम्, न श्रोत्रब्रह्मादिवत्। किं तत् ? य आत्मा आत्मशब्देन प्रत्यगात्मोच्यते, तत्र आत्मशब्दस्य प्रसिद्धत्वात्। सर्वाभ्यन्तरः सर्वान्तरः, यद् यः शब्दाभ्यां प्रसिद्ध आत्मा ब्रह्मेति तमात्मानम्।** (बृहदारण्यकोपनिषद् ३।४।१ शाङ्करभाष्यम्)

एवं प्रकारेण शास्त्रार्थस्य सन्दर्भान् विचारयद्भिरस्माभिर्जिज्ञासोः स्थूला सूक्ष्मा चेति द्विविधामपि जिज्ञासां परीक्ष्य समाधानं कर्तुं क्षमं कुशलमुपदेष्टृत्वं याज्ञवल्क्ये दृश्यते। वैदेहजनकस्य जिज्ञासाया ब्रह्मर्षेर्याज्ञवल्क्यस्य उत्तरस्य च चतुर्थाध्यायगतेषु सन्दर्भेषु आत्मविषयका बहवो दार्शनिकाः पक्षा अभिव्यक्ता निरूपिताश्च दृश्यन्ते। वेदान्तप्रतिपाद्यस्य आत्मनः स्वयंप्रकाशत्वम्, मोक्षस्य मार्गः, गुरूपसत्तिः (गुरोराश्रयणम्), वागादीनामुपासना, आत्मनः साक्षित्वम्, जाग्रदाद्यवस्थानां भोगे आत्मनोऽसङ्गता, आत्मदर्शनस्य साधनानि, वैदेहजनकस्य अभयप्राप्तिरित्यादयः प्रभूता विषयाः तत्र समुपस्थापिताः प्रतिपादिताश्च सन्ति।

याज्ञवल्क्यस्मृतौ बृहद्योगियाज्ञवल्क्यस्मृतौ चापि याज्ञवल्क्यस्य अद्वैतवेदान्तविषयकं दार्शनिकं चिन्तनं प्राप्यते, यत्र निष्कामभावेन नियतकर्मणामनुष्ठेयता, मोक्षप्राप्तेरुपायाः, आत्मबोधस्य अवश्यकर्तव्यता, आत्मनोऽनात्मसंसारस्य च स्वरूपमित्यादीनां सम्यग् विवेचनं विद्यते। एवमुपनिषत्सु स्मृतिग्रन्थेषु च प्राप्ता याज्ञवल्क्यस्य उपदेशात्मकाः सन्दर्भा अद्वैतवेदान्तस्य सैद्धान्तिकीं सरणिं (परम्पराम्) यथावदवलम्बितवन्तः प्राप्यन्ते। तेषु तेषु सन्दर्भेषु ब्रह्मर्षिणा यद्यद् भाषितम्, तैः सर्वैरपि विषयैरद्वैतदर्शनस्य सैद्धान्तिकं स्वरूपमेव विश्लेषितं विशिष्टीकृतञ्च वर्तते।

प्रस्तुतान् ग्रन्थानतिरिच्य महाभारतस्य शान्तिपर्वणः ३१०-३१८ अध्यायेष्वपि महर्षेर्याज्ञवल्क्यस्य दार्शनिका विचाराः प्राप्यन्ते। तत्र भीष्मेण युधिष्ठिराय वर्णितो जनक-याज्ञवल्क्ययोः संवादो विद्यते। महाभारतस्य शान्तिपर्वणि स्थितोऽयं खण्डो विद्वत्समाजे 'याज्ञवल्क्यगीता' नाम्नापि प्रसिद्धास्ति। अस्मिन् संवादे याज्ञवल्क्यस्य अद्वैतवेदान्तपरकं दार्शनिकं चिन्तनमंशतः प्राप्यते।

**याज्ञवल्क्यस्य वैचारिकाणि वैशिष्ट्यानि**

महर्षेर्याज्ञवल्क्यस्य पृथक् दर्शनन्तु नास्ति तथापि तस्य दार्शनिकचिन्तनशैल्यां तत्त्वनिरूपणस्य पद्धत्यां जिज्ञासानां समाधानार्थं प्रयुक्तासु युक्तिषु दृष्टान्तेषु च विचित्रं पृथग् वैशिष्ट्यं स्फुरति। तस्य मुख्यानि वैशिष्ट्यानि अधस्तात् तालिकायां बिन्दुरूपेण समासेन एवं प्रस्तोतुं शक्यन्ते-

मुख्यदार्शनिकयोगदानानामङ्कनम्

| क्र.सं. | दार्शनिकी अवधारणा | मूलं शास्त्रीयं स्रोतः | व्यावहारिकं / दार्शनिकं तात्पर्यम् |
|---|---|---|---|
| १. | आत्मसाक्षात्कारस्य साधनानि | बृहदारण्यकोपनिषद् २/४/५ | वेदान्तवाक्यानां श्रवणस्य तन्मननस्य निदिध्यासनस्य च अनिवार्यता मुक्तये |
| २. | आत्मनः परमप्रेमास्पदत्वम् | बृहदारण्यकोपनिषद् २/४/५ | संसारस्य सर्वाण्यपि वस्तूनि आत्मार्थं प्रियाणि भवन्ति |
| ३. | मुक्तये त्रिविधानामेषणानां त्यागः | बृहदारण्यकोपनिषद् ३/५/१ | पुत्रैषणायाः, वित्तैषणायाः, लोकैषणायाश्च व्युत्थाय मुक्तये प्रयतनम् |
| ४. | संन्यासः/ वैराग्यम् | जाबालोपनिषद् ४/१ | उपगते हि वैराग्ये संन्यासग्रहणं करणीयम् |
| ५. | आत्मनः स्वयंज्योतिष्ट्वम् | बृहदारण्यकोपनिषद् ४/३/२३ | ज्ञानं नहि आत्मधर्मोऽपितु आत्मस्वरूपमेव |

## वैशिष्ट्यानां विश्लेषणम्

**श्रवण-मनन-निदिध्यासनानां मूलम्**

आत्मदर्शनस्य तथा च तत्साधनानां परिचर्चायां सर्वाधिकमुद्ध्रियमाणं वाक्यम् “आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः” (बृहदारण्यकोपनिषद् २/४/५) इति अद्वैतवेदान्तसमाजाय महर्षि-याज्ञवल्क्येनैव प्रदत्तं वर्तते। ज्ञानसाधनत्वेन श्रवणादीनां स्पष्टं कथनमपि अस्मिन्नेव वाक्ये समाहितं विद्यते।

**आत्मनः परमप्रेमास्पदत्वम्**

आत्मनः प्रियत्वे एव आत्मसम्बद्धानां प्रियत्वदृष्टिं विधाय भर्ता, पुत्रः, वित्तम्, कलत्रम् (पत्नी), ब्राह्मणः, क्षत्रियः, लोकाः, देवाः किंवा समग्रा अपि स्वार्थसाधकाः पदार्थाः प्रिया प्रतीयन्ते– **“न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति......... न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति”** (बृहदारण्यकोपनिषद् २/४/५)। येन सन्दर्भेण आत्मनः परमप्रेमास्पदत्वं परमानन्दरूपत्वञ्च याज्ञवल्क्येन निरूपितं वर्तते, तमेव विषयं परवर्तिन आचार्या अपि स्वकीयशास्त्रचर्चाया विषयं कृतवन्तो दृश्यन्ते–

**तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि।**
**अतस्तत्परमं तेन परमानन्दतात्मनः।।** (विद्यारण्यस्वामी, पञ्चदशी १/९)

**त्रिविधैषणात्मकस्य संसारस्य हेयता**

त्रिविधाभिरेषणाभिः सह संसारं संयोज्य संसारस्य वैयर्थ्यं हेयत्वं च चिन्तयितुं शैली अपि अस्माभिर्महर्षि-याज्ञवल्क्यत एव प्राप्ता वर्तते– **"एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति"** (बृहदारण्यकोपनिषद् ३/५/१)।

**सद्यः संन्यासग्रहणस्य क्रान्तिकारी मार्गः**

समुत्पन्ने हि वैराग्ये वैराग्योत्पत्तेः समनन्तरमेव वा संन्यासो ग्रहणीय इति युक्तिपूर्णं निर्देशनं याज्ञवल्क्यस्य अस्ति। यस्मिन्नहनि वैराग्यमुत्पद्यते, तस्मिन्नेवाहनि संन्यसनीयमिति सुस्पष्टं निर्देशनं याज्ञवल्क्यतोऽस्माभिः प्राप्तं वर्तते– **"यदहरेव विरजेत् तदहरेव प्रव्रजेत्"** (जाबालोपनिषद् ४/१)। यावत्पर्यन्तं मनुष्य एषणात्रयाद् विमुक्तो भवितुं न शक्नोति, तावत्पर्यन्तं स संसारे अनुरक्त एव तिष्ठति, स विरक्तो न भवति। अत एव एषणात्रयान्मुक्तिं विना अथवा वैराग्यभावे आरोहणं विना संन्यासिना न भाव्यम्, वैराग्यसम्पन्नो जनो यस्मिन् कस्मिन्नपि आश्रमे स्थितो भवेत्, संन्यसितुं शक्नोतीति भावोऽनेन ध्वनितो भवति।

**मनसो ज्ञानसाधनत्वं वृत्तिव्याप्तिश्च**

याज्ञवल्क्येन आत्मनः साक्षादपरोक्षत्वस्य निर्देशः कृतोऽस्ति– **"यत्साक्षादपरोक्षाद्ब्रह्म"** (बृहदारण्यकोपनिषद् ३/४/१), अपरपक्षे च तस्य साक्षात्कारे तेन मनसः साक्षात्साधनत्वं प्रदर्शितमनुभूयते–

मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।। (बृहदारण्यकोपनिषद् ४/४/१९)

केवंल मनो ब्रह्म विषयीकुर्वदपि श्रवणादिसंस्कृतं तदाकारं जायते, तेन द्रष्टव्यं तदुच्यतेऽत एव वृत्तिव्याप्यं ब्रह्मेत्युपगच्छन्तीति भावः। (तत्रैव आनन्दगिरिटीका)

परवर्तिन आचार्या अपि शास्त्राचार्योपदेशपूर्वकं निर्मलीकृते मनसि आत्मबोधकरणत्वं दर्शयन्तो याज्ञवल्क्यस्यैव अनुकरणं कृतवन्तो दृश्यन्ते– **"शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्"** (भगवद्गीता–शाङ्करभाष्यम् २/२१)। शास्त्रे निर्दिष्टं मनस आत्मबोधे साधनत्वमसाधनत्वञ्चेति निर्देशेन आत्मनि फलव्याप्तेर्निषेधं कृत्वा वृत्तिव्याप्तेर्विषयता प्रदर्शितास्तीति सङ्केतितं भवति। यो जन एतादृशस्य वृत्तिव्याप्यस्य आत्मतत्त्वस्य साक्षात्कारं न करोति, स आत्मनि नानात्वस्य (भेदस्य) अभावेऽपि अविद्यावशान्नानात्वस्य आरोपं करोति, पौनःपुन्येन मृत्युमेव प्राप्नोति, अमरत्वं च स प्राप्तुं न शक्नोतीति तथ्यमपि अस्मिन्नेव सन्दर्भे गतार्थं भवति।

**ज्ञानस्य स्वरूपगता नित्यता**

द्रष्टुर्दृष्टेर्नित्यत्वस्य निरूपणपूर्वकं याज्ञवल्क्येन ज्ञानमात्मधर्मो न भूत्वा आत्मस्वरूपमेव अस्ति, आत्मा च स्वयंप्रकाश इति सङ्केतितं वर्तते– **"नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते"** (बृहदारण्यकोपनिषद् ४/३/२३)। अत एव सर्वसाक्षिणमात्मानं कश्चिदपि ज्ञेयत्वेन ज्ञातुं न शक्नोति–

**येनेदं सर्वं विजानाति तं केन विजानीयात् ?**
**विज्ञातारमरे केन विजानीयात् ?** (बृहदारण्यकोपनिषद् २/४/१४)

**ज्ञानोत्तरकाले प्रपञ्चस्य बाधः**

यदा अत्र द्वैतमेव नास्ति, तर्हि कः कं पश्येत्, जानीयात्, मन्वीत, वदेदित्यादिनीनां युक्तीनां साहाय्येन याज्ञवल्क्येन आत्मनोऽद्वितीयत्वमनात्मवस्तुनः सर्वथा असत्त्वञ्च निरूपितमस्ति– **"यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभिवदेत्तत् केन कं मन्वीत तत् केन कं विजानीयाद्येनेदं सर्वं विजानाति तं केन जानीयाद्विज्ञातारमरे केन विजानीयादिति"** (बृहदारण्यकोपनिषद् २/४/१४)। यावत्पर्यन्तं द्वैतमिव प्रतीयते, तावत्पर्यन्तमेव द्वितीयस्य प्रतीतिर्भवति। वस्तुतः ज्ञानोदयात् पूर्वमेव द्वैतस्य प्रतीतिः। यदा तु मुमुक्षुः तत्त्ववेदनानन्तरमद्वैतानुभूतिं कर्तुमारभते, तदा द्वैतप्रतीतिः कुत्र तिष्ठेत् ? अत एव स्वाप्निकः प्रपञ्चः स्वप्नकालं यावत् सत्यः प्रतिभासमानोऽपि जाग्रति यथा तस्य असत्त्वं सिद्ध्यति, तथैव अद्वैतानुभूतिं यावदेव जाग्रत्प्रपञ्चः सत्तावत्त्वेन प्रतीयते। एवंप्रकारेण ज्ञानोत्तरकाले प्रपञ्चस्य बाधो निश्चितोऽस्तीति सङ्केतोऽपि अस्मात् सन्दर्भादवाप्यते।

**उपसंहारः**

विधिमुखं (अन्वयः) निषेधमुखं (व्यतिरेकः) चेति अद्वैतवेदान्तस्य द्वे प्रमुखे उपदेशशैल्यौ, ये महर्षिणा याज्ञवल्क्येन सम्यग् अङ्गीकृते स्तः। अन्वयप्रक्रियायां तेन आत्मनोऽन्तर्यामित्वमाध्यमेन सार्वात्म्यभावस्य उपदेशः कृतः– **"यः सर्वेषु भूतेषु तिष्ठन्... अन्तर्याम्यमृतः"** (बृहदारण्यकोपनिषद् ३/७/१५)। परञ्च यदा जागतिकपदार्थेषु सत्यत्वस्य भ्रमस्य उत्पत्तेः सम्भावना दृश्यते, तदा निषेधमुखप्रक्रियया अद्वितीयत्वस्य साधनार्थं "**नेति नेति**" इति अमोघमस्त्रं प्रयुक्तम्– **"स एष नेति नेत्यात्मा"** (बृहदारण्यकोपनिषद् ३/९/२६)।

अमुष्यैव समन्वयस्य कारणात् तेन एकपक्षतः **"इदं सर्वं यदयमात्मा"** इति प्रतिपाद्य अपरपक्षतः **"अतोऽन्यदार्तम्"** इत्युक्त्वा अनात्मप्रपञ्चं विनाशिनं मिथ्या च घोषितुं मनागपि सङ्कोचो न कृतः। तस्य अनयैव शैल्या परवर्तिनामाचार्याणां कृते **'ब्रह्म सत्यं जगन्मिथ्या'** इति सिद्धान्तस्य स्तम्भस्थापनाय मार्गः प्रशस्तीकृतः।

अद्वैतवेदान्तस्य परम्परागतायामाचार्यवन्दनायाम् (**नारायणं पद्मभवं वसिष्ठं...**) महर्षेर्याज्ञवल्क्यस्य नाम्नः प्रत्यक्षरूपेण संलग्नताया अभावादपि श्रौतसंवादानां स्मृत्यादिग्रन्थानाञ्च माध्यमेन तेन दत्तस्य योगदानस्य औन्नत्यमतुलनीयं वर्तते। तस्य जन्मभूमिः कर्मभूमिश्च आर्षभूमिर्नेपालः। वर्तमानवैश्विकपरिप्रेक्ष्येऽपि महर्षेर्याज्ञवल्क्यस्य इयमद्वैतपरा वैचारिकी धारा अध्यात्मचिन्तकानाम्, वेदान्ताध्येतॄणां मुमुक्षुसाधकानाञ्च कृते समानान्तररूपेण शश्वन्मार्गदर्शिका सिद्धास्तीति शम्।

**कृतज्ञताज्ञापनम्**

**'याज्ञवल्क्यीया दार्शनिकी दृष्टिः'** इति शीर्षके सज्जीकृतोऽयमालेख इदानीं विश्वविद्यालय-अनुदान-आयोगः, सानोठिमी, भक्तपुरम् इत्यतो विद्यावारिधिः (PhD) इत्युपाधये विद्वद्वृत्यन्तर्गततया सम्प्राप्तसुविधायां नेपाल-संस्कृत-विश्वविद्यालयानुसन्धानकेन्द्रतः क्रियमाणस्य **'अद्वैतदर्शनपरम्परायां याज्ञवल्क्यावदानम्'** इति शीर्षकस्यैवाङ्गभूत इति विज्ञापयन् आलेखस्यास्य सज्जीकरणे चैतन्योद्बोधकत्वेन मामुपकृतवद्भ्यः शोधनिर्देशकेभ्यः

श्रद्धेयेभ्यः **प्रा.डा.गुरुप्रसादसुवेदि-गुरुचरणेभ्य** एवञ्च शोधकार्यार्थं विद्वद्वृत्तिप्रदानेन मामुपकृतवते **विश्वविद्यालयानुदानायोगाय** च विशेषतः कार्तज्ज्ञभावमभिव्यनज्मि।

## सन्दर्भ-सूची


आचार्य, सायण (ख्रीष्टाब्द १९४०). *शतपथब्राह्मण माध्यन्दिन (भाष्य.)*. लक्ष्मी वेंकटेश प्रेस।

*ईशादि नौ उपनिषद् : शाङ्करभाष्यार्थ* (वि.सं. २०६०). गोविन्द भवन कार्यालय।

कौण्डिन्न्यायन, आमोदवर्धन (वैक्रमाब्द २०६८). अद्वैतवेदान्तमा याज्ञवल्क्य. *जनक* (दार्शनिक मुखपत्र), वर्ष १२, अङ्क १२, पृ. ५६-६२, श्रीराजर्षि-जनक-स्मृति-कोष।

गिरि, रामानन्द (वैक्रमाब्द २०७३). *ईशादि दश उपनिषद्* (व्याख्या.). महेश-संस्कृत-गुरुकुलम्।

गिरि, रामानन्द (वि.सं. २०५०) *जनकदर्शनम् (राजर्षेर्जनकस्य विदेहसिद्धान्तस्य समीक्षात्मकमध्ययनम्)* [विद्यावारिधेः शोधप्रबन्धः]. महेन्द्र-संस्कृत-विश्वविद्यालयः]।

तिमिल्सिना, रोहिणीराज (वि.सं. २०७६). *महर्षि-याज्ञवल्क्यः* (सत्यमोहन-जोशीप्रणीतस्य दार्शनिकनाटकस्य संस्कृतानुवादः). नेपाल-प्रज्ञा-प्रतिष्ठान।

पाण्डेय, रामनारायणदत्त (वि.सं. २०५१). *महाभारत* ((अनु. छठा संस्करण, खण्ड १–६). गीताप्रेस।

वारे., श्रीधर अण्णाशास्त्री (शकाब्द १८५८). *याज्ञवल्क्य-चरित्र.* नासिक : श्रीधर अण्णाशास्त्री वारे.।

शर्मा, वासुदेवः (टिप्पणी.) (ख्रीष्टाब्दस्य १९०९). *याज्ञवल्क्यस्मृतिः* (योगीश्वर-महर्षि-याज्ञवल्क्यप्रणीता). तुकाराम जावजी, निर्णय सागर प्रेस।

शर्मा, रेखा चालिसे (वि.सं. २०८२). *श्रीविद्यारण्यमुनिद्वारा विरचित पञ्चदशी (भावव्याख्या)*. दीपकनाथ, दीपेश एवं दीपिका-कुलेन्द्रन चालिसे।

शास्त्री, जगदीश (ख्रीष्टाब्द १९७०). *उपनिषत्सङ्ग्रहः* (प्रथमो द्वितीयश्च भागः). मोतीलाल बनारसीदास पब्लिशर्स

*बृहदारण्यकोपनिषद् सानुवाद शाङ्करभाष्यसहित* (वि.सं. २०७२). (अठारहवाँ पुनर्मुद्रण). गीताप्रेस।

सरस्वती, नृसिंह (वि.सं. १९५७). *वेदान्तसारः* (संस्कृतटीका तथा रामस्वरूपकृत हिन्दीव्याख्या). श्रीकृष्णदासात्मज खेमराज।

स्वामी कुवलयानन्द तथा शास्त्री रघुनाथ कोकजे (ख्रीष्टाब्द १९५१). *बृहद्योगियाज्ञवल्क्यस्मृतिः* (सम्पा.). कैवल्यधाम, श्रीमन्माधवयोगमन्दिरसमिति।